

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता — क्रम पाठः

## पञ्चमकाण्डे सप्तमः प्रश्नः

### उपानुवाक्यावशिष्ट कर्मनिरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

यो वै। वा अय॑थादेवतम्। अय॑थादेवतम॒ग्निम्। अय॑थादेवत॒मित्यय॑था—दे॒व॒त॒म्। अ॒ग्निम् चि॑नुते। चि॒नु॒त आ। आ दे॒वता᳚भ्यः। दे॒वता᳚भ्यो वृश्च्यते। वृ॒श्च्य॒ते॒ पापी॑यान्। पापी॑यान् भवति। भ॒व॒ति॒ यः। यो य॑थादे॒व॒तम्। य॒था॒दे॒व॒तम् न। य॒था॒दे॒व॒तमिति॑ यथा—दे॒व॒तम्। न दे॒वता᳚भ्यः। दे॒वता᳚भ्य॒ आ। आ वृ॑श्च्यते। वृ॒श्च्य॒ते॒ वसी॑यान्। वसी॑यान् भवति। भ॒व॒त्या॒ग्ने॒य्या। आ॒ग्ने॒य्या गाय॑त्रिया। गा॒य॒त्रि॒या प्र॑थ॒माम्। प्र॒थ॒माम् चिति᳚म्। चिति॑म॒भि। अ॒भि मृ॑शेत्। मृ॒शे॒त् त्रि॒ष्टुभा᳚। त्रि॒ष्टुभा᳚ द्वि॒तीया᳚म्। द्वि॒तीया॒म् जग॑त्या। जग॑त्या तृ॒तीया᳚म्। तृ॒तीया॑मनु॒ष्टुभा᳚। अ॒नु॒ष्टुभा॑ चतु॒र्थी᳚म्। अ॒नु॒ष्टुभेत्य॑नु—स्तुभा᳚। च॒तु॒र्थी᳚म् प॒ङ्क्त्या। प॒ङ्क्त्या प॑ञ्चमीम्। प॒ञ्च॒मीँय्य॑थादे॒व॒तम्। य॒था॒दे॒व॒त॒मे॒व। य॒था॒दे॒व॒तमिति॑ यथा—दे॒व॒तम्। ए॒वाग्निम्। अ॒ग्निम् चि॑नुते। चि॒नु॒ते न। न दे॒वता᳚भ्यः। दे॒वता᳚भ्य॒ आ। आ वृ॑श्च्यते। वृ॒श्च्य॒ते॒ वसी॑यान्। वसी॑यान् भवति। भ॒व॒तीडा॑यै। इडा॑यै॒ वै। वा ए॒षा। ए॒षा विभ॑क्तिः। विभ॑क्तिः प॒शव॑ः। विभ॑क्ति॒रिति॒ वि—भ॒क्ति॒ः। प॒शव॒ इडा᳚। इडा॑ प॒शुभि॑ः। प॒शुभि॑रेनम्। प॒शु॒भि॒रिति॑ प॒शु—भि॒ः। ए॒न॒म् चि॒नु॒ते। ॥ [१] ॥ चि॒नु॒ते यः। यो वै। वै प्र॒जाप॑तये। प्र॒जाप॑तये प्रति॒प्रोच्य॑। प्र॒जाप॑तय॒ इति॑ प्र॒जा—प॒त॒ये॒। प्र॒ति॒प्रोच्या॒ग्निम्। प्र॒ति॒प्रोच्येति॑ प्रति—प्रोच्य॑। अ॒ग्निम् चि॒नोति॑। चि॒नो॒ति॒ न। नार्ति᳚म्। आर्ति॒मा। आर्च्छ॑ति। ऋ॒च्छ॒त्यश्वौ᳚। अश्वा॑व॒भित॑ः। अ॒भित॑स्तिष्ठेताम्। ति॒ष्ठे॒ता॒म् कृ॒ष्णः। कृ॒ष्ण उ॑त्तर॒तः। उ॒त्त॒र॒तः श्वे॒तः। उ॒त्त॒र॒त इत्यु॑त्—त॒र॒तः। श्वे॒तो दक्षि॑णः। दक्षि॑ण॒स्तौ। तावा॒लभ्य॑। आ॒लभ्येष्ट॑काः।

आलभ्येत्याँ—लभ्यं। इष्टका उपं। उपं दद्ध्यात्। दद्ध्यादेतत्। एतद् वै। वै प्रजापतेः। प्रजापतेः रूपम्। प्रजापतेरिति प्रजा—पतेः। रूपम् प्राजापत्यः। प्राजापत्योऽश्वः। प्राजापत्य इति प्राजा—पत्यः। अश्वः साख्षात्। साख्षादेव। साख्षादिति स—अख्षात्। एव प्रजापतये। प्रजापतये प्रतिप्रोच्यं। प्रजापतय इति प्रजा—पतये। प्रतिप्रोच्याग्निम्। प्रतिप्रोच्येति प्रति—प्रोच्यं। अग्निम् चिनोति। चिनोति न। नार्तिम्। आर्तिमा। आर्च्छति। ऋच्छत्येतत्। एतद् वै। वा अह्नः। अह्नो रूपम्। रूपयँ्यत्। यच्छ्वेतः। श्वेतोऽश्वः। अश्वो रात्रियै। रात्रियै कृष्णः। कृष्ण एतत्। एतदह्नः। अह्नो रूपम्। ॥ [२] ॥ रूपयँ्यत्। यदिष्टकाः। इष्टका रात्रियै। रात्रियै पुरीषम्। पुरीषमिष्टकाः। इष्टका उपधास्यन्न्। उपधास्यञ्छ्वेतम्। उपधास्यन्नित्युप—धास्यन्न्। श्वेतमश्वम्। अश्वमभि। अभि मृशेत्। मृशेत् पुरीषम्। पुरीषमुपधास्यन्न्। उपधास्यन् कृष्णम्। उपधास्यन्नित्युप—धास्यन्न्। कृष्णमहोरात्राभ्याम्। अहोरात्राभ्यामेव। अहोरात्राभ्यामित्यहः—रात्राभ्याम्। एवैनम्। एनम् चिनुते। चिनुते हिरण्यपात्रम्। हिरण्यपात्रम् मधोः। हिरण्यपात्रमिति हिरण्य—पात्रम्। मधोः पूर्णम्। पूर्णम् ददाति। ददाति मधव्यः। मधव्योऽसानि। असानीति। इति सौर्या। सौर्या चित्रवत्या। चित्रवत्याऽव। चित्रवत्येति चित्र—वत्या। अवेख्षते। ईख्षते चित्रम्। चित्रमेव। एव भवति। भवति मद्ध्यन्दिने। मद्ध्यन्दिनेऽश्वम्। अश्वमव। अव घ्रापयति। घ्रापयत्यसौ। असौ वै। वा आदित्यः। आदित्य इन्द्रः। इन्द्र एषः। एष प्रजापतिः। प्रजापतिः प्राजापत्यः। प्रजापतिरिति प्रजा—पतिः। प्राजापत्योऽश्वः। प्राजापत्य इति प्राजा—पत्यः। अश्वस्तम्। तमेव। एव साख्षात्। साख्षादृद्ध्नोति। साख्षादिति स—अख्षात्। ऋद्ध्नोतीत्यृद्ध्नोति॥ ॥ [३] ॥

(एन मेतदह्नो ऽष्टाचत्वारिꣳशच्च) ॥ १ ॥

---

त्वामग्ने। अग्ने वृषभम्। वृषभम् चेकितानम्। चेकितानम् पुनः। पुनर् युवानम्। युवानम् जनयन्न्। जनयन्नुपागाम्। उपागामित्युप—आगाम्॥ अस्थूरिणः। नो गार्हपत्यानि। गार्हपत्यानि सन्तु। गार्हपत्यानीति गार्ह—पत्यानि। सन्तु तिग्मेन। तिग्मेन नः। नो ब्रह्मणा। ब्रह्मणा सम्। सꣳ शिशाधि। शिशाधीति शिशाधि॥ पशवो वै। वा एते। एते यत्। यदिष्टकाः।

इष्टकाश्चित्यांश्चित्याम्। चित्यांश्चित्यामृषभम्। चित्यांश्चित्यामिति चित्याम्—चित्याम्। ऋषभ-मुप। उप दधाति। दधाति मिथुनम्। मिथुनमेव। एवास्य। अस्य तत्। तद् यज्ञे। यज्ञे करोति। करोति प्रजननाय। प्रजननाय तस्मात्। प्रजननायेति प्र—जननाय। तस्माद् यूथेयूथे। यूथेयूथ ऋषभः। यूथेयूथ इति यूथे—यूथे। ऋषभ इत्यृषभः॥ सँव्वथ्सरस्य प्रतिमाम्। सँव्वथ्सरस्येति सम्—वथ्सरस्य। प्रतिमाय्ँयाम्। प्रतिमामिति प्रति—माम्। याम् त्वा। त्वा रात्रि। रात्र्युपासते। उपासत इत्युप—आसते॥ प्रजाꣳ सुवीराम्। प्रजामिति प्र—जाम्। सुवीराम् कृत्वा। सुवीरा-मिति सु—वीराम्। कृत्वा विश्वम्। विश्वमायुः। आयुर् वि। व्यꣳश्नवत्। अश्नवदित्यꣳश्नवत्॥ प्राजापत्यामेताम्। प्राजापत्यामिति प्राजा—पत्याम्। ॥ [४] ॥ एतामुप। उप दधाति। दधा-तीयम्। इयँव्वाव। वावैषा। एषैकाष्टका। एकाष्टका यत्। एकाष्टकेत्येक—अष्टका। यदेव। एवै-काष्टकायाम्। एकाष्टकायामन्नम्। एकाष्टकायामित्येक—अष्टकायाम्। अन्नम् क्रियते। क्रियते तत्। तदेव। एवैतया। एतयाऽव। अव रुन्धे। रुन्ध एषा। एषा वै। वै प्रजापतेः। प्रजा-पतेः कामदुघा। प्रजापतेरिति प्रजा—पतेः। कामदुघा तया। कामदुघेति काम—दुघा। तयैव। एव यजमानः। यजमानोऽमुष्मिन्न्। अमुष्मिँल्लोके। लोकेऽग्निम्। अग्निम् दुहे। दुहे येन। येन देवाः। देवा ज्योतिषा। ज्योतिषोद्ध्वाः। ऊद्ध्वा उदायन्न्। उदायन्न्येन। उदायन्नित्युत्—आयन्न्। येनादित्याः। आदित्या वसवः। वसवो येन। येन रुद्राः। रुद्रा इति रुद्राः॥ येना-ङ्गिरसः। अङ्गिरसो महिमानम्। महिमानमानशुः। आनशुस्तेन। तेनैतु। एतु यजमानः। यजमानः स्वस्ति। स्वस्तीति स्वस्ति॥ सुवर्गाय वै। सुवर्गायेति सुवः—गाय। वा एषः। एष लोकाय। लोकाय चीयते। ॥ [५] ॥ चीयते यत्। यदग्निः। अग्निर् येन। येन देवाः। देवा ज्योतिषा। ज्योतिषोद्ध्वाः। ऊद्ध्वा उदायन्न्। उदायन्निति। उदायन्नित्युत्—आयन्न्। इत्युख्य्ँम्। उख्यꣳ सम्। समिन्धे। इन्ध इष्टकाः। इष्टका एव। एवैताः। एता उप। उप धत्ते। धत्ते वानस्पत्याः। वानस्पत्याः सुवर्गस्य। सुवर्गस्य लोकस्य। सुवर्गस्येति सुवः—गस्य। लोकस्य समष्ट्यै। समष्ट्यै शतायुधाय। समष्ट्या इति सम्—अष्ट्यै। शतायुधाय शतवीर्याय। शतायुधायेति शत—आयुधाय। शतवीर्याय शतोतये। शतवीर्यायेति शत—वीर्याय। शतोत-येऽभिमातिषाहे। शतोतय इति शत—ऊतये। अभिमातिषाह इत्यभिमाति—साहे॥ शतय्ँयः।

यो नः। नः शरदः। शरदो अजीतान्। अजीतानिन्द्रः। इन्द्रो नेषत्। नेषदति। अति दुरितानि। दुरितानि विश्वा। दुरितानीति दुः—इतानि। विश्वेति विश्वा॥ ये चत्वारः। चत्वारः पथयः। पथयो देवयानाः। देवयाना अन्तरा। देवयाना इति देव—यानाः। अन्तरा द्यावापृथिवी। द्यावा-पृथिवी वियन्ति। द्यावापृथिवी इति द्यावा—पृथिवी। वियन्तीति वि—यन्ति॥ तेषाय्यैः। यो अज्यानिम्। अज्यानिमजीतिम्। अजीतिमावहात्। आवहात् तस्मै। आवहादित्या—वहात्। तस्मै नः। नो देवाः। देवाः परि। ॥ [६] ॥ परि दत्त। दत्तेह। इह सर्वे। सर्व इति सर्वे॥ ग्रीष्मो हेमन्तः। हेमन्त उत। उत नः। नो वसन्तः। वसन्तः शरत्। शरद् वर्षाः। वर्षाः सुवितम्। सुवितम् नः। नो अस्तु। अस्त्वित्यस्तु॥ तेषामृतूनाम्। ऋतूनाꣳ शतशारदानाम्। शतशार-दानाम् निवाते। शतशारदानामिति शत—शारदानाम्। निवात एषाम्। निवात इति नि—वाते। एषामभये। अभये स्याम। स्यामेति स्याम॥ इदुवथ्सराय परिवथ्सराय। इदुवथ्सरायेतीदु—वथ्सराय। परिवथ्सराय सँव्वथ्सराय। परिवथ्सरायेति परि—वथ्सराय। सँव्वथ्सराय कृणुत। सँव्वथ्सरायेति सम्—वथ्सराय। कृणुता बृहत्। बृहन् नमः। नम इति नमः॥ तेषाँव्वयम्। वयꣳ सुमतौ। सुमतौ यज्ञियानाम्। सुमताविति सु—मतौ। यज्ञियानाम् ज्योक्। ज्योगजीताः। अजीता अहताः। अहताः स्याम। स्यामेति स्याम॥ भद्रान् नः। नः श्रेयः। श्रेयः सम्। सम-नैष्ट। अनैष्ट देवाः। देवास्त्वया। त्वयाऽवसेन। अवसेन सम्। समशीमहि। अशीमहि त्वा। त्वेति त्वा॥ स नः। नो मयोभूः। मयोभूः पितो। मयोभूरिति मयः—भूः। पितो आ। पितो इति पितो। ॥ [७] ॥ आ विशस्व। विशस्व शम्। शम् तोकाय। तोकाय तनुवे। तनुवे स्योनः। स्योन इति स्योनः॥ अज्यानीरेताः। एता उप। उप दधाति। दधात्येताः। एता वै। वै देवताः। देवता अपराजिताः। अपराजितास्ताः। अपराजिता इत्यपरा—जिताः। ता एव। एव प्र। प्र विशति। विशति न। नैव। एव जीयते। जीयते ब्रह्मवादिनः। ब्रह्मवादिनो वदन्ति। ब्रह्मवादिन इति ब्रह्म—वादिनः। वदन्ति यत्। यदर्द्धमासाः। अर्द्धमासा मासाः। अर्द्धमासा इत्यर्द्ध—मासाः। मासा ऋतवः। ऋतवः सँव्वथ्सरः। सँव्वथ्सर ओषधीः। सँव्वथ्सर इति सम्—वथ्सरः। ओषधीः पचन्ति। पचन्त्यथ। अथ कस्मात्। कस्मादन्याभ्यः। अन्याभ्यो देवताभ्यः। देवताभ्य आग्रयणम्। आग्रयणम् निः। निरुप्यते। उप्यत इति। इत्येताः। एता

हि। हि तत्। तद् देवताः। देवता उदजयन्न्। उदजयन्नृयत्। उदजयन्नित्युत्—अजयन्न्। यदृ-तुभ्यः। ऋतुभ्यो निर्वपेत्। ऋतुभ्य इत्यृतु—भ्यः। निर्वपेद् देवताभ्यः। निर्वपेदिति निः—वपेत्। देवताभ्यः समदम्। समदम् दद्ध्यात्। समदमिति स—मदम्। दद्ध्यादाग्रयणम्। आग्रयणम् निरुप्य। निरुप्यैताः। निरुप्येति निः—उप्य। एता आहुतीः। आहुतीर् जुहोति। आहुतीरित्या—हुतीः। जुहोत्यर्द्धमासान्। अर्द्धमासानेव। अर्द्धमासानित्यर्द्ध—मासान्। एव मासान्। मासा-नृतून्। ऋतून्थ् संव्वँथ्सरम्। संव्वँथ्सरम् प्रीणाति। संव्वँथ्सरमिति सम्—वथ्सरम्। प्रीणाति न। न देवताभ्यः। देवताभ्यः समदम्। समदम् दधाति। समदमिति स—मदम्। दधाति भद्रात्। भद्रान् नः। नः श्रेयः। श्रेयः सम्। समनैष्ट। अनैष्ट देवाः। देवा इति। इत्याह। आह हुताद्याय। हुताद्याय यजमानस्य। हुताद्यायेति हुत—अद्याय। यजमनस्यापराभावाय। अपराभावायेत्य-परा—भावाय॥ ॥ [८] ॥

(प्रजापत्याम् लोकाय देवाः पितो दध्यादाग्रयणम् पञ्चविंशतिश्च) ॥ २ ॥

इन्द्रस्य वज्रः। वज्रोऽसि। असि वार्त्रघ्नः। वार्त्रघ्नस्तनूपाः। वार्त्रघ्न इति वार्त्र—घ्नः। तनूपा नः। तनूपा इति तनू—पाः। नः प्रतिस्पशः। प्रतिस्पश इति प्रति—स्पशः॥ यो नः। नः पुरस्तात्। पुरस्ताद् दक्षिणतः। दक्षिणतः पश्चात्। पश्चादुत्तरतः। उत्तरतोऽघायुः। उत्त-रत इत्युत्—तरतः। अघायुरभिदासति। अघायुरित्यघ—युः। अभिदासत्येतम्। अभिदासती-त्यभि—दासति। एतꣳ सः। सोऽश्मानम्। अश्मानमृच्छतु। ऋच्छत्वित्यृच्छतु॥ देवासुराः सय्यँत्ताः। देवासुरा इति देव—असुराः। सय्यँत्ता आसन्न्। सय्यँत्ता इति सम्—यत्ताः। आसन् ते। तेऽसुराः। असुरा दिग्भ्यः। दिग्भ्य आ। दिग्भ्य इति दिक्—भ्यः। आऽबाधन्त। अबाधन्त तान्। तान् देवाः। देवा इष्वा। इष्वा च। च वज्रेण। वज्रेण च। चाप। अपानुदन्त। अनु-दन्त यत्। यद् वज्रिणीः। वज्रिणीरुपदधाति। उपदधातीष्वा। उपदधातीत्युप—दधाति। इष्वा च। चैव। एव तत्। तद् वज्रेण। वज्रेण च। च यजमानः। यजमानो भ्रातृव्यान्। भ्रात्यव्या-नप। अप नुदते। नुदते दिक्षु। दिक्षूप। उप दधाति। ॥ [९] ॥ दधाति देवपुराः। देवपुरा एव। देवपुरा इति देव—पुराः। एवैताः। एतास्तनूपानीः। तनूपानीः परि। तनूपानीरिति तनू—

पानीः। पर्यूहते। ऊहतेऽग्नाविष्णू। अग्नाविष्णू सजोषसा। अग्नाविष्णू इत्यग्ना—विष्णू। सजोष-सेमाः। सजोषसेति स—जोषसा। इमा वर्द्धन्तु। वर्द्धन्तु वाम्। वाम् गिरः। गिर इति गिरः॥ द्युम्नैर् वाजेभिः। वाजेभिरा। आ गतम्। गतमिति गतम्॥ ब्रह्मवादिनो वदन्ति। ब्रह्मवादिन इति ब्रह्म—वादिनः। वदन्ति यत्। यन् न। न देवतायै। देवतायै जुह्वति। जुह्वत्यथ। अथ किन्देवत्या। किन्देवत्या वसोः। किन्देवत्येति किम्—देवत्या। वसोर्धारा। धारेति। इत्यग्निः। अग्निर् वसुः। वसुस्तस्य। तस्यैषा। एषा धारा। धारा विष्णुः। विष्णुर् वसुः। वसुस्तस्य। तस्यैषा। एषा धारा। धाराऽऽग्नावैष्णव्या। आग्नावैष्णव्यर्चा। आग्नावैष्णव्येत्याग्ना—वैष्णव्या। ऋचा वसोः। वसोर्धाराम्। धाराम् जुहोति। जुहोति भागधेयेन। भागधेयेनैव। भागधेयेनेति भाग—धेयेन। एवैनौ। एनौ सम्। समर्द्धयति। अर्द्धयत्यथो। अथो एताम्। अथो इत्यथो। एतामेव। ॥ [१०] ॥ एवाहुतिम्। आहुतिमायतनवतीम्। आहुतिमित्या—हुतिम्। आयतन-वतीम् करोति। आयतनवतीमित्यायतन—वतीम्। करोति यत्कामः। यत्काम एनाम्। यत्काम इति यत्—कामः। एनाम् जुहोति। जुहोति तत्। तदेव। एवाव। अव रुन्धे। रुन्धे रुद्रः। रुद्रो वै। वा एषः। एष यत्। यदग्निः। अग्निस्तस्य। तस्यैते। एते तनुवौ। एते इत्येते। तनुवौ घोरा। घोराऽन्या। अन्या शिवा। शिवाऽन्या। अन्या यत्। यच्छतरुद्रीयम्। शतरुद्रीयम् जुहोति। शतरुद्रीयमिति शत—रुद्रीयम्। जुहोति या। यैव। एवास्य। अस्य घोरा। घोरा तनूः। तनूस्ताम्। ताम् तेन। तेन शमयति। शमयति यत्। यद् वसोः। वसोर् धाराम्। धाराम् जुहोति। जुहोति या। यैव। एवास्य। अस्य शिवा। शिवा तनूः। तनूस्ताम्। ताम् तेन। तेन प्रीणाति। प्रीणाति यः। यो वै। वै वसोः। वसोर् धारायै। धारायै प्रतिष्ठाम्। ॥ [११] ॥ प्रतिष्ठाम्वेद। प्रतिष्ठामिति प्रति—स्थाम्। वेद प्रति। प्रत्येव। एव तिष्ठति। तिष्ठति यत्। यदाज्यम्। आज्य-मुच्छिष्येत। उच्छिष्येत तस्मिन्न्। उच्छिष्येतेत्युत्—शिष्येत। तस्मिन् ब्रह्मौदनम्। ब्रह्मौदनम् पचेत्। ब्रह्मौदनमिति ब्रह्म—ओदनम्। पचेत् तम्। तम् ब्राह्मणाः। ब्राह्मणाश्चत्वारः। चत्वारः प्र। प्राश्नीयुः। अश्नीयुरेषः। एष वै। वा अग्निः। अग्निर् वैश्वानरः। वैश्वानरो यत्। यद् ब्राह्मणः। ब्राह्मण एषा। एषा खलु। खलु वै। वा अग्नेः। अग्नेः प्रिया। प्रिया तनूः। तनूर् यत्। यद् वैश्वानरः। वैश्वानरः प्रियायाम्। प्रियायामेव। एवैनाम्। एनाम् तनुवाम्। तनुवाम्

प्रति। प्रतिष्ठापयति। स्थापयति चतस्रः। चतस्रो धेनूः। धेनूर् दद्यात्। दद्यात् ताभिः। ताभिरेव। एव यजमानः। यजमानोऽमुष्मिन्न्। अमुष्मिँल्लोके। लोकेऽग्निम्। अग्निम् दुहे। दुह इति दुहे॥ ॥ [१२] ॥

(उपै ताम् धारायै षट्चत्वारिꣳशाच्च) ॥ ३ ॥

चित्तिम् जुहोमि। जुहोमि मनसा। मनसा घृतेन। घृतेनेति। इत्याह। आहादाभ्या। अदाभ्या वै। वै नाम। नामैषा। एषाऽऽहुतिः। आहुतिर् वैश्वकर्मणी। आहुतिरित्या—हुतिः। वैश्वकर्मणी न। वैश्वकर्मणीति वैश्व—कर्मणी। नैनम्। एनम् चिक्यानम्। चिक्यानम् भ्रातृव्यः। भ्रातृव्यो दभ्नोति। दभ्नोत्यथो। अथो देवताः। अथो इत्यथो। देवता एव। एवाव। अव रुन्धे। रुन्धेऽग्ने। अग्ने तम्। तमद्य। अद्येति। इति पङ्क्त्या। पङ्क्त्या जुहोति। जुहोति पङ्क्त्या। पङ्क्त्याऽऽहुत्या। आहुत्या यज्ञमुखम्। आहुत्येत्या—हुत्या। यज्ञमुखमा। यज्ञमुखमिति यज्ञ—मुखम्। आ रभते। रभते सप्त। सप्त ते। ते अग्ने। अग्ने समिधः। समिधः सप्त। समिध इति सम्—इधः। सप्त जिह्वाः। जिह्वा इति। इत्याह। आह होत्राः। होत्रा एव। एवाव। अव रुन्धे। रुन्धेऽग्निः। अग्निर् देवेभ्यः। देवेभ्योऽप। अपाक्रामत्। अक्रामद् भागधेयम्। भागधेयमिच्छमानः। भागधेयमिति भाग—धेयम्। ॥ [१३] ॥ इच्छमानस्तस्मै। तस्मा एतत्। एतद् भागधेयम्। भागधेयम् प्र। भागधेयमिति भाग—धेयम्। प्रायच्छन्न्। अयच्छन्नेतत्। एतद् वै। वा अग्ने। अग्नेरग्निहोत्रम्। अग्निहोत्रमेतर्हि। अग्निहोत्रमित्यग्नि—होत्रम्। एतर्हि खलु। खलु वै। वा एषः। एष जातः। जातो यर्हि। यर्हि सर्वः। सर्वश्चितः। चितो जाताय। जातायैव। एवास्मै। अस्मा अन्नम्। अन्नमपि। अपि दधाति। दधाति सः। स एनम्। एनम् प्रीतः। प्रीतः प्रीणाति। प्रीणाति वसीयान्। वसीयान् भवति। भवति ब्रह्मवादिनः। ब्रह्मवादिनो वदन्ति। ब्रह्मवादिन इति ब्रह्म—वादिनः। वदन्ति यत्। यदेषः। एष गार्हपत्यः। गार्हपत्यश्चीयते। गार्हपत्य इति गार्ह—पत्यः। चीयतेऽथ। अथ क्व। क्वास्य। अस्याहवनीयः। आहवनीय इति। आहवनीय इत्या—हवनीयः। इत्यसौ। असावादित्यः। आदित्य इति। इति ब्रूयात्। ब्रूयादेतस्मिन्न्। एतस्मिन्हि। हि सर्वाभ्यः। सर्वाभ्यो देवताभ्यः। देवताभ्यो जुह्वति। जुह्वति

यः। ॥ [१४] ॥ य एवम्। एवव्ँविद्वान्। विद्वानग्निम्। अग्निम् चिनुते। चिनुते साख्षात्। साख्षादेव। साख्षादिति स—अख्षात्। एव देवताः। देवता ऋद्ध्नोति। ऋद्ध्नोत्यग्ने। अग्ने यशस्विन्न्। यशस्विन्यशसा। यशसेमम्। इममर्पय। अर्पयेन्द्रावतीम्। इन्द्रावतीमपचितीम्। इन्द्रावतीमितीन्द्र—वतीम्। अपचितीमिह। अपचितीमित्यप—चितीम्। इह। आ वह। वहेति वह॥ अयम् मूर्द्धा। मूर्द्धा परमेष्ठि। परमेष्ठी सुवर्चाः। सुवर्चाः समानानाम्। सुवर्चा इति सु—वर्चाः। समानानामुत्तमश्लोकः। उत्तमश्लोको अस्तु। उत्तमश्लोक इत्युत्तम—श्लोकः। अस्त्वि-त्यस्तु॥ भद्रम् पश्यन्तः। पश्यन्त उप। उप सेदुः। सेदुरग्रे। अग्रे तपः। तपो दीख्षाम्। दीख्षामृषयः। ऋषयः सुवर्विदः। सुवर्विद इति सुवः—विदः॥ ततः ख्षत्रम्। ख्षत्रम् बलम्। बलमोजः। ओजश्च। च जातम्। जातम् तत्। तदस्मै। अस्मै देवाः। देवा अभि। अभि सम्। सम् नमन्तु। नमन्त्विति नमन्तु॥ धाता विधाता। विधाता परमा। विधातेति वि—धाता। परमोत। ॥ [१५] ॥ उत सन्दृक्। सन्दृक् प्रजापतिः। सन्दृगिति सम्—दृक्। प्रजापतिः परमेष्ठी। प्रजापतिरिति प्रजा—पतिः। परमेष्ठी विराजा। विराजेति वि—राजा॥ स्तोमाश्छ-न्दाꣳसि। छन्दाꣳसि निविदः। निविदो मे। निविद इति नि—विदः। म आहुः। आहुरेतस्मै। एतस्मै राष्ट्रम्। राष्ट्रमभि। अभि सम्। सम् नमाम। नमामेति नमाम॥ अभ्यावर्तद्ध्वमुप। अभ्यावर्तद्ध्वमित्यभि—आवर्तद्ध्वम्। उपमा। मा। एत। इत साकम्। साकमयम्। अयꣳ शास्ता। शास्ताऽधिपतिः। अधिपतिर् वः। अधिपतिरित्यधि—पतिः। वो अस्तु। अस्त्वि-त्यस्तु॥ अस्य विज्ञानम्। विज्ञानमनु। विज्ञानमिति वि—ज्ञानम्। अनु सम्। सꣳ रभद्ध्वम्। रभद्ध्वमिमम्। इमम् पश्चात्। पश्चादनु। अनु जीवाथ। जीवाथ सर्वे। सर्व इति सर्वे॥ राष्ट्रभृत एताः। राष्ट्रभृत इति राष्ट्र—भृतः। एता उप। उप दधाति। दधात्येषा। एषा वै। वा अग्नेः। अग्नेश्चितिः। चिती राष्ट्रभृत्। राष्ट्रभृत् तया। राष्ट्रभृदिति राष्ट्र—भृत्। तयैव। एवास्मिन्न्। अस्मिन् राष्ट्रम्। राष्ट्रम् दधाति। दधाति राष्ट्रम्। राष्ट्रमेव। एव भवति। भवति न। नास्मात्। अस्माद् राष्ट्रम्। राष्ट्रम् भ्रꣳशते। भ्रꣳशत इति भ्रꣳशते॥ ॥ [१६] ॥

(भागधेयम् जुहोति परमा राष्ट्रम् दधाति सप्त च) ॥ ४ ॥

यथा वै। वै पुत्रः। पुत्रो जातः। जातो म्रियते। म्रियत एवम्। एवँवै। वा एषः। एष म्रियते। म्रियते यस्य। यस्याग्निः। अग्निरुख्यः। उख्य उद्वायति। उद्वायति यत्। उद्वायतीत्युत्—वायति। यन् निर्मन्थ्यम्। निर्मन्थ्यम् कुर्यात्। निर्मन्थ्यमिति निः—मन्थ्यम्। कुर्याद् वि। विच्छिन्द्यात्। छिन्द्याद् भ्रातृव्यम्। भ्रातृव्यमस्मै। अस्मै जनयेत्। जनयेथ् सः। स एव। एव पुनः। पुनः परीद्ध्यः। परीद्ध्यः स्वात्। परीद्ध्य इति परि—इद्ध्यः। स्वादेव। एवैनम्। एनय्ँयोनेः। योनेर् जनयति। जनयति न। नास्मै। अस्मै भ्रातृव्यम्। भ्रातृव्यम् जनयति। जनयति तमः। तमो वै। वा एतम्। एतम् गृह्णाति। गृह्णाति यस्य। यस्याग्निः। अग्निरुख्यः। उख्य उद्वायति। उद्वायति मृत्युः। उद्वायतीत्युत्—वायति। मृत्युस्तमः। तमः कृष्णम्। कृष्णँवासः। वासः कृष्णा। कृष्णा धेनुः। धेनुर् दक्षिणा। दक्षिणा तमसा। तमसैव। ॥ [१७] ॥ एव तमः। तमो मृत्युम्। मृत्युमप। अप हते। हते हिरण्यम्। हिरण्यम् ददाति। ददाति ज्योतिः। ज्योतिर् वै। वै हिरण्यम्। हिरण्यम् ज्योतिषा। ज्योतिषैव। एव तमः। तमोऽप। अप हते। हतेऽथो। अथो तेजः। अथो इत्यथो। तेजो वै। वै हिरण्यम्। हिरण्यम् तेजः। तेज एव। एवात्मन्न्। आत्मन् धत्ते। धत्ते सुवः। सुवर् न। न घर्मः। घर्मः स्वाहा। स्वाहा सुवः। सुवर् न। नार्कः। अर्कः स्वाहा। स्वाहा सुवः। सुवर्न। न शुक्रः। शुक्रः स्वाहा। स्वाहा सुवः। सुवर् न। न ज्योतिः। ज्योतिः स्वाहा। स्वाहा सुवः। सुवर् न। न सूर्यः। सूर्यः स्वाहा। स्वाहाऽर्कः। अर्को वै। वा एषः। एष यत्। यदग्निः। अग्निरसौ। असावादित्यः। आदित्योऽश्वमेधः। ॥ [१८] ॥ अश्वमेधो यत्। अश्वमेध इत्यश्व—मेधः। यदेताः। एता आहुतीः। आहुतीर् जुहोति। आहुतीरित्या—हुतीः। जुहोत्यर्काश्वमेधयोः। अर्काश्वमेधयोरेव। अर्काश्वमेधयोरित्यर्क—अश्वमेधयोः। एव ज्योतीꣳषि। ज्योतीꣳषि सम्। सम् दधाति। दधात्येषः। एष ह। ह तु। त्वै। वा अर्काश्वमेधी। अर्काश्वमेधी यस्य। अर्काश्वमेधीत्यर्क—अश्वमेधी। यस्यैतत्। एतदग्नौ। अग्नौ क्रियते। क्रियत आपः। आपो वै। वा इदम्। इदमग्रे। अग्रे सलिलम्। सलिलमासीत्। आसीथ् सः। स एताम्। एताम् प्रजापतिः। प्रजापतिः प्रथमाम्। प्रजापतिरिति प्रजा—पतिः। प्रथमाम् चितिम्। चितिमपश्यत्। अपश्यत् ताम्। तामुप। उपाधत्त। अधत्त तत्। तदियम्। इयमभवत्। अभवत् तम्। तँविश्वकर्मा। विश्वकर्माऽब्रवीत्। विश्वकर्मेति विश्व—कर्मा। अब्रवीदुप।

उप त्वा। त्वा। आऽयानि। अयानीति। इति न। नेह। इह लोकः। लोकोँऽस्ति। अस्तीति। इत्यब्रवीत्। ॥ [१९] ॥ अब्रवीथ् सः। स एताम्। एताम् द्वितीयाम्। द्वितीयाम् चितिम्। चितिमपश्यत्। अपश्यत् ताम्। तामुप। उपाधत्त। अधत्त तत्। तदन्तरिख्षम्। अन्तरिख्षमभवत्। अभवथ् सः। स यज्ञः। यज्ञः प्रजापतिम्। प्रजापतिमब्रवीत्। प्रजापतिमिति प्रजा—पतिम्। अब्रवीदुप। उप त्वा। त्वा। आऽयानि। अयानीति। इति न। नेह। इह लोकः। लोकोँऽस्ति। अस्तीति। इत्यब्रवीत्। अब्रवीथ् सः। स विश्वकर्माणम्। विश्वकर्माणमब्रवीत्। विश्वकर्माणमिति विश्व—कर्माणम्। अब्रवीदुप। उप त्वा। त्वा। आऽयानि। अयानीति। इति केन। केन मा। मोपैष्यसि। उपैष्यसीति। उपैष्यसीत्युप—ऐष्यसि। इति दिश्याभिः। दिश्याभिरिति। इत्यब्रवीत्। अब्रवीत् तम्। तम् दिश्याभिः। दिश्याभिरुपैत्। उपैत् ताः। उपैदित्युप—ऐत्। ता उप। उपाधत्त। अधत्त ताः। ता दिशः। दिशोऽभवन्न्। ॥ [२०] ॥ अभवन्थ् सः। स परमेष्ठी। परमेष्ठी प्रजापतिम्। प्रजापतिमब्रवीत्। प्रजापतिमिति प्रजा—पतिम्। अब्रवीदुप। उप त्वा। त्वा। आऽयानि। अयानीति। इति न। नेह। इह लोकः। लोकोँऽस्ति। अस्तीति। इत्यब्रवीत्। अब्रवीथ् सः। स विश्वकर्माणम्। विश्वकर्माणम् च। विश्वकर्माणमिति विश्व—कर्माणम्। च यज्ञम्। यज्ञम् च। चाब्रवीत्। अब्रवीदुप। उप वाम्। वामा। आऽयानि। अयानीति। इति न। नेह। इह लोकः। लोकोँऽस्ति। अस्तीति। इत्यब्रूताम्। अब्रूताꣳ सः। स एताम्। एताम् तृतीयाम्। तृतीयाम् चितिम्। चितिमपश्यत्। अपश्यत् ताम्। तामुप। उपाधत्त। अधत्त तत्। तदसौ। असावभवत्। अभवथ् सः। स आदित्यः। आदित्यः प्रजापतिम्। प्रजापतिमब्रवीत्। प्रजापतिमिति प्रजा—पतिम्। अब्रवीदुप। उप त्वा। त्वा। ॥ [२१] ॥ आऽयानि। अयानीति। इति न। नेह। इह लोकः। लोकोँऽस्ति। अस्तीति। इत्यब्रवीत्। अब्रवीथ् सः। स विश्वकर्माणम्। विश्वकर्माणम् च। विश्वकर्माणमिति विश्व—कर्माणम्। च यज्ञम्। यज्ञम् च। चाब्रवीत्। अब्रवीदुप। उप वाम्। वामा। आऽयानि। अयानीति। इति न। नेह। इह लोकः। लोकोँऽस्ति। अस्तीति। इत्यब्रूताम्। अब्रूताꣳ सः। स परमेष्ठिनम्। परमेष्ठिनमब्रवीत्। अब्रवीदुप। उप त्वा। त्वा। आऽयानि। अयानीति। इति केन। केन मा। मोपैष्यसि। उपैष्यसीति। उपैष्यसीत्युप—ऐष्यसि। इति लोकम्पृणया। लोकम्पृण-

येति। लोकम्पृणयेति लोकम्—पृणया। इत्यब्रवीत्। अब्रवीत् तम्। तँल्लोकम्पृणया। लोक-
म्पृणयोपैत्। लोकम्पृणयेति लोकम्—पृणया। उपैत् तस्मात्। उपैदित्युप—ऐत्। तस्माद्-
यातयाम्नी। अयातयाम्नी लोकम्पृणा। अयातयाम्नीत्ययात—याम्नी। लोकम्पृणाऽयातयामा।
लोकम्पृणेति लोकम्—पृणा। अयातयामा हि। अयातयामेत्ययात—यामा। ह्यसौ। असावा-
दित्यः। ॥ [२२] ॥ आदित्यस्तान्। तानृषयः। ऋषयोऽब्रुवन्न्। अब्रुवन्नुप। उप वः। व आ।
आऽयाम। अयामेति। इति केन। केन नः। न उपैष्यथ। उपैष्यथेति। उपैष्यथेत्युप—ऐष्यथ।
इति भूम्ना। भूम्नेति। इत्यब्रुवन्न्। अब्रुवन् तान्। तान् द्वाभ्याम्। द्वाभ्याम् चितीभ्याम्। चिती-
भ्यामुपायन्न्। चितीभ्यामिति चिति—भ्याम्। उपायन्थ् सः। उपायन्नित्युप—आयन्न्। स पञ्च-
चितीकः। पञ्चचितीकः सम्। पञ्चचितीक इति पञ्च—चितीकः। समपद्यत। अपद्यत यः। य
एवम्। एवँव्विद्वान्। विद्वानग्निम्। अग्निम् चिनुते। चिनुते भूयान्। भूयानेव। एव भवति। भव-
त्यभि। अभीमान्। इमाँल्लोकान्। लोकान् जयति। जयति विदुः। विदुरेनम्। एनम् देवाः। देवा
अथो। अथो एतासाम्। अथो इत्यथो। एतासामेव। एव देवतानाम्। देवतानाꣳ सायुज्यम्।
सायुज्यम् गच्छति। गच्छतीति गच्छति॥ ॥ [२३] ॥

(तमसा ऽऽदित्यो ऽस्तीति दिश आदित्यः प्रजापतिमब्रवीदुप त्वा ऽसौ पञ्चचत्वारिꣳशच्च) ॥ ५ ॥

⋆

वयो वै। वा अग्निः। अग्निर् यत्। यदग्निचित्। अग्निचित् पख्षिणः। अग्निचिदित्यग्नि—
चित्। पख्षिणोऽश्ञीयात्। अश्ञीयात् तम्। तमेव। एवाग्निम्। अग्निमद्यात्। अद्यादार्तिम्।
आर्तिमा। आर्च्छेत्। ऋच्छेथ् सँव्वथ्सरम्। सँव्वथ्सरँव्व्रतम्। सँव्वथ्सरमिति सम्—वथ्सरम्।
व्रतम् चरेत्। चरेथ् सँव्वथ्सरम्। सँव्वथ्सरꣳ हि। सँव्वथ्सरमिति सम्—वथ्सरम्। हि व्रतम्।
व्रतम् न। नाति। अति पशुः। पशुर् वै। वा एषः। एष यत्। यदग्निः। अग्निर्हिनस्ति।
हिनस्ति खलु। खलु वै। वै तम्। तम् पशुः। पशुर् यः। य एनम्। एनम् पुरस्तात्। पुरस्तात्
प्रत्यञ्चम्। प्रत्यञ्चमुपचरति। उपचरति तस्मात्। उपचरतीत्युप—चरति। तस्मात् पश्चात्।
पश्चात् प्राङ्ङ्। प्राङ्ङुपचर्यः। उपचर्य आत्मनः। उपचर्य इत्युप—चर्यः। आत्मनोऽहिꣳ-
सायै। अहिꣳसायै तेजः। तेजोऽसि। असि तेजः। तेजो मे। मे यच्छ। यच्छ पृथिवीम्।

पृथिवीय्यँच्छ। यच्छ पृथिव्यै। ॥ [२४] ॥ पृथिव्यै माँ। मा पाहि। पाहि ज्योतिः। ज्योति-रसि। असि ज्योतिः। ज्योतिर् मे। मे यच्छ। यच्छान्तरिख्षम्। अन्तरिख्षय्यँच्छ। यच्छान्त-रिख्षात्। अन्तरिख्षान् मा। मा पाहि। पाहि सुवः। सुवरसि। असि सुवः। सुवर् मे। मे यच्छ। यच्छ दिवम्। दिवय्यँच्छ। यच्छ दिवः। दिवो माँ। मा पाहि। पाहीति। इत्याह। आहैताभिः। एताभिर् वै। वा इमे। इमे लोकाः। लोका विधृताः। विधृता यत्। विधृता इति वि—धृताः। यदेताः। एता उपदधाति। उपदधात्येषाम्। उपदधातीत्युप—दधाति। एषाल्लोँकानाम्। लोका-नाव्विँधृत्यै। विधृत्यै स्वयमातृण्णाः। विधृत्या इति वि—धृत्यै। स्वयमातृण्णा उपधाय। स्वय-मातृण्णा इति स्वयम्—आतृण्णाः। उपधाय हिरण्येष्टकाः। उपधायेत्युप—धाय। हिरण्येष्टका उप। हिरण्येष्टका इति हिरण्य—इष्टकाः। उप दधाति। दधातीमे। इमे वै। वै लोकाः। लोकाः स्वयमातृण्णाः। स्वयमातृण्णा ज्योतिः। स्वयमातृण्णा इति स्वयम्—आतृण्णाः। ज्योति-र्हिरण्यम्। हिरण्यय्यँत्। यथ् स्वयमातृण्णाः। स्वयमातृण्णा उपधाय। स्वयमातृण्णा इति स्वयम्—आतृण्णाः। उपधाय हिरण्येष्टकाः। उपधायेत्युप—धाय। ॥ [२५] ॥ हिरण्येष्टका उपदधाति। हिरण्येष्टका इति हिरण्य—इष्टकाः। उपदधातीमान्। उपदधातीत्युप—दधाति। इमानेव। एवैताभिः। एताभिर् लोकान्। लोकान् ज्योतिष्मतः। ज्योतिष्मतः कुरुते। कुरु-तेऽथो। अथो एताभिः। अथो इत्यथो। एताभिरेव। एवास्मै। अस्मा इमे। इमे लोकाः। लोकाः प्र। प्र भान्ति। भान्ति याः। यास्ते। ते अग्ने। अग्ने सूर्ये। सूर्ये रुचः। रुच उद्यतः। उद्यतो दिवम्। उद्यत इत्युत्—यतः। दिवमातन्वन्ति। आतन्वन्ति रश्मिभिः। आतन्वन्तीत्या—तन्वन्ति। रश्मिभिरिति रश्मि—भिः॥ ताभिः सर्वाभिः। सर्वाभी रुचे। रुचे जनाय। जनाय नः। नस्कृधि। कृधीति कृधि॥ या वः। वो देवाः। देवाः सूर्ये। सूर्ये रुचः। रुचो गोषु। गोष्वश्वेषु। अश्वेषु याः। या रुचः। रुच इति रुचः॥ इन्द्राग्नी ताभिः। इन्द्राग्नी इतीन्द्र—अग्नी। ताभिः सर्वाभिः। सर्वाभी रुचम्। रुचम् नः। नो धत्त। धत्त बृहस्पते। बृहस्पत इति बृहस्पते॥ रुचम् नः। नो धेहि। धेहि ब्राह्मणेषु। ॥ [२६] ॥ ब्राह्मणेषु रुचम्। रुचꣳ राजसु। राजसु नः। राजस्विति राज—सु। नस्कृधि। कृधीति कृधि॥ रुचव्विँश्येषु। विश्येषु शूद्रेषु। शूद्रेषु मयि। मयि धेहि। धेहि रुचा। रुचा रुचम्। रुचमिति रुचम्॥ द्वेधा वै। वा अग्निम्। अग्निम् चिक्यानस्य। चिक्या-

नस्य यशः। यश इन्द्रियम्। इन्द्रियम् गच्छति। गच्छत्यग्निम्। अग्निवँवा। वा चितम्। चितमीजानम्। ईजानवँवा। वा यत्। यदेताः। एता आहुतीः। आहुतीर् जुहोति। आहुतीरित्या—हुतीः। जुहोत्यात्मन्न्। आत्मन्नेव। एव यशः। यश इन्द्रियम्। इन्द्रियम् धत्ते। धत्त ईश्वरः। ईश्वरो वै। वा एषः। एष आर्तिम्। आर्तिमार्तोः। आर्तोर् यः। आर्तोरित्या—अर्तोः। योऽग्निम्। अग्निम् चिन्वन्न्। चिन्वन्नधिक्रामति। अधिक्रामति तत्। अधिक्रामतीत्यधि—क्रामति। तत् त्वा। त्वा यामि। यामि ब्रह्मणा। ब्रह्मणा वन्दमानः। वन्दमान इति। इति वारुण्या। वारुण्यर्चा। ऋचा जुहुयात्। ॥ [२७] ॥ जुहुयाच्छान्तिः। शान्तिरेव। एवैषा। एषाऽग्ने। अग्नेर् गुप्तिः। गुप्तिरात्मनः। आत्मनो हविष्कृतः। हविष्कृतो वै। हविष्कृत इति हविः—कृतः। वा एषः। एष यः। योऽग्निम्। अग्निम् चिनुते। चिनुते यथा। यथा वै। वै हविः। हविः स्कन्दति। स्कन्दत्येवम्। एववँवै। वा एषः। एष स्कन्दति। स्कन्दति यः। योऽग्निम्। अग्निम् चित्वा। चित्वा स्त्रियम्। स्त्रियमुपैति। उपैति मैत्रावरुण्या। उपैतीत्युप—एति। मैत्रावरुण्याऽऽमिक्षया। मैत्रावरुण्येति मैत्रा—वरुण्या। आमिक्षया यजेत। यजेत मैत्रावरुणताम्। मैत्रावरुणतामेव। मैत्रावरुणतामिति मैत्रा—वरुणताम्। एवोप। उपैति। एत्यात्मनः। आत्मनोऽस्कन्दाय। अस्कन्दाय यः। यो वै। वा अग्निम्। अग्निमृतुस्थाम्। ऋतुस्थावँवेद। ऋतुस्थामित्यृतु—स्थाम्। वेदर्तुर्ऋतुः। ऋतुर्ऋतुरस्मै। ऋतुर्ऋतुरित्यृतुः—ऋतुः। अस्मै कल्पमानः। कल्पमान एति। एति प्रति। प्रत्येव। एव तिष्ठति। तिष्ठति सँवँथ्सरः। सँवँथ्सरो वै। सँवँथ्सर इति सम्—वथ्सरः। वा अग्निः। अग्निर्ऋतुस्थाः। ॥ [२८] ॥ ऋतुस्थास्तस्य। ऋतुस्था इत्यृतु—स्थाः। तस्य वसन्तः। वसन्तः शिरः। शिरो ग्रीष्मः। ग्रीष्मो दक्षिणः। दक्षिणः पक्षः। पक्षो वर्षाः। वर्षाः पुच्छम्। पुच्छꣳ शरत्। शरदुत्तरः। उत्तरः पक्षः। उत्तर इत्युत्—तरः। पक्षो हेमन्तः। हेमन्तो मद्ध्यम्। मद्ध्यम् पूर्वपक्षाः। पूर्वपक्षा श्चितयः। पूर्वपक्षा इति पूर्व—पक्षाः। चितयोऽपरपक्षाः। अपरपक्षाः पुरीषम्। अपरपक्षा इत्यपर—पक्षाः। पुरीषमहोरात्राणि। अहोरात्राणीष्टकाः। अहोरात्राणीत्यहः—रात्राणि। इष्टका एषः। एष वै। वा अग्निः। अग्निर्ऋतुस्थाः। ऋतुस्था यः। ऋतुस्था इत्यृतु—स्थाः। य एवम्। एववँवेद। वेदर्तुर्ऋतुः। ऋतुर्ऋतुरस्मै। ऋतुर्ऋतुरित्यृतुः—ऋतुः। अस्मै कल्पमानः। कल्पमान एति। एति

प्रति। प्रत्येव। एव तिष्ठति। तिष्ठति प्रजापतिः। प्रजापतिर् वै। प्रजापतिरिति प्रजा—पतिः। वा एतम्। एतम् ज्यैष्ठ्यकामः। ज्यैष्ठ्यकामो नि। ज्यैष्ठ्यकाम इति ज्यैष्ठ्य—कामः। न्यधत्त। अधत्त ततः। ततो वै। वै सः। स ज्यैष्ठ्यम्। ज्यैष्ठ्यमगच्छत्। अगच्छद् यः। य एवम्। एवँविद्वान्। विद्वानग्निम्। अग्निम् चिनुते। चिनुते ज्यैष्ठ्यम्। ज्यैष्ठ्यमेव। एव गच्छति। गच्छ-तीति गच्छति॥ ॥ [२९] ॥

(पृथिवीम् यच्छ यथ् स्वयमातृण्णा उपधार्य धेह्य चा ग्नि श्चिनुते त्रीणि च) ॥ ६ ॥

---

यदाकूतात्। आकूताथ् समसुस्रोत्। आकूतादित्या—कूतात्। समसुस्रोद्धृदः। समसुस्रो-दिति सम्—असुस्रोत्। हृदो वा। वा मनसः। मनसो वा। वा सम्भृतम्। सम्भृतम् चक्षुषः। सम्भृतमिति सम्—भृतम्। चक्षुषो वा। वेति वा॥ तमनु। अनु प्र। प्रेहि। इहि सुकृतस्य। सुकृतस्य लोकम्। सुकृतस्येति सु—कृतस्य। लोकँय्यत्र। यत्रर्षयः। ऋषयः प्रथमजाः। प्रथ-मजा ये। प्रथमजा इति प्रथम—जाः। ये पुराणाः। पुराणा इति पुराणाः॥ एतꣳ सधस्थ। सधस्थ परि। सधस्थेति सध—स्थ। परि ते। ते ददामि। ददामि यम्। यमावहात्। आव-हाच्छेवधिम्। आवहादित्या—वहात्। शेवधिम् जातवेदाः। शेवधिमिति शेव—धिम्। जात-वेदा इति जात—वेदाः॥ अन्वागन्ता यज्ञपतिः। अन्वागन्तेत्यनु—आगन्ता। यज्ञपतिर् वः। यज्ञपतिरिति यज्ञ—पतिः। वो अत्र। अत्र तम्। तꣳ स्म। स्म जानीत। जानीत परमे। परमे व्योमन्न्। व्योमन्निति वि—ओमन्न्॥ जानीतादेनम्। एनम् परमे। परमे व्योमन्न्। व्योमन् देवाः। व्योमन्निति वि—ओमन्न्। देवाः सधस्थाः। सधस्था विद। सधस्था इति सध—स्थाः। विद रूपम्। रूपमस्य। अस्येत्यस्य॥ यदागच्छात्। आगच्छात् पथिभिः। आगच्छादित्या—गच्छात्। ॥ [३०] ॥ पथिभिर् देवयानैः। पथिभिरिति पथि—भिः। देवयानैरिष्टापूर्ते। देवया-नैरिति देव—यानैः। इष्टापूर्ते कृणुतात्। इष्टापूर्ते इतीष्टा—पूर्ते। कृणुतादाविः। आविरस्मै। अस्मा इत्यस्मै॥ सम् प्र। प्र च्यवद्ध्वम्। च्यवद्ध्वमनु। अनु सम्। सम् प्र। प्र यात। याताग्ने। अग्ने पथः। पथो देवयानान्। देवयानान् कृणुद्ध्वम्। देवयानानिति देव—यानान्। कृणुद्ध्वमिति कृणुद्ध्वम्॥ अस्मिन्थ् सधस्थे। सधस्थे अधि। सधस्थ इति सध—स्थे। अद्ध्युत्तरस्मिन्न्।

उत्तरस्मिन् विश्वे। उत्तरस्मिन्नित्युत्—तरस्मिन्न्। विश्वे देवाः। देवा यजमानः। यजमानश्च। च सीदत। सीदतेति सीदत॥ प्रस्तरेण परिधिना। प्रस्तरेणेति प्र—स्तरेण। परिधिना स्रुचा। परिधिनेति परि—धिना। स्रुचा वेद्या। वेद्या च। च बर्हिषा। बर्हिषेति बर्हिषा॥ ऋचेमम्। इमय्ँयज्ञम्। यज्ञम् नः। नो वह। वह सुवः। सुवर् देवेषु। देवेषु गन्तवे। गन्तव इति गन्तवे॥ यदिष्टम्। इष्टय्ँयत्। यत् परादानम्। परादानय्ँयत्। परादानमिति परा—दानम्। यद् दत्तम्। दत्तय्ँया। या च। च दक्षिणा। दक्षिणेति दक्षिणा॥ तदग्निः। ॥ [३१] ॥ अग्निर् वैश्वकर्मणः। वैश्वकर्मणः सुवः। वैश्वकर्मण इति वैश्व—कर्मणः। सुवर् देवेषु। देवेषु नः। नो दधत्। दधदिति दधत्॥ येना सहस्रम्। सहस्रव्ँवहसि। वहसि येन। येनाग्ने। अग्ने सर्ववेदसम्। सर्ववेदसमिति सर्व—वेदसम्॥ तेनेमम्। इमय्ँयज्ञम्। यज्ञम् नः। नो वह। वह सुवः। सुवर् देवेषु। देवेषु गन्तवे। गन्तव इति गन्तवे॥ येनाग्ने। अग्ने दक्षिणाः। दक्षिणा युक्ताः। युक्ता यज्ञम्। यज्ञव्ँवहन्ति। वहन्त्यृत्विजः। ऋत्विज इत्यृत्विजः॥ तेनेमम्। इमय्ँयज्ञम्। यज्ञम् नः। नो वह। वह सुवः। सुवर् देवेषु। देवेषु गन्तवे। गन्तव इति गन्तवे॥ येनाग्ने। अग्ने सुकृतः। सुकृतः पथा। सुकृत इति सु—कृतः। पथा मधोः। मधोर् धाराः। धारा व्यानशुः। व्यानशुरिति वि—आनशुः॥ तेनेमम्। इमय्ँयज्ञम्। यज्ञम् नः। नो वह। वह सुवः। सुवर् देवेषु। देवेषु गन्तवे। गन्तव इति गन्तवे॥ यत्र धाराः। धारा अनपेताः। अनपेता मधोः। अनपेता इत्यनप—इताः। मधोर् घृतस्य। घृतस्य च। च याः। या इति याः॥ तदग्निः। अग्निर् वैश्वकर्मणः। वैश्वकर्मणः सुवः। वैश्वकर्मण इति वैश्व—कर्मणः। सुवर् देवेषु। देवेषु नः। नो दधत्। दधदिति दधत्॥ ॥ [३२] ॥

(आगच्छात् त द्व्यानशुस्तेनेमम् यज्ञम् नो वह सुवर्देवेषु गन्तवे चतुर्दश च) ॥ ७ ॥

यास्ते। ते अग्ने। अग्ने समिधः। समिधो यानि। समिध इति सम्—इधः। यानि धाम। धाम या। या जिह्वा। जिह्वा जातवेदः। जातवेदो यः। जातवेद इति जात—वेदः। यो अर्चिः। अर्चिरित्यर्चिः॥ ये ते। ते अग्ने। अग्ने मेडयः। मेडयो ये। य इन्दवः। इन्दवस्तेभिः। तेभिरात्मानम्। आत्मानम् चिनुहि। चिनुहि प्रजानन्न्। प्रजानन्निति प्र—जानन्न्॥ उथ्सन्नयज्ञो वै। उथ्सन्नयज्ञ

इत्युंथ्सन्न—यज्ञः। वा एषः। एष यत्। यदग्निः। अग्निः किम्। किंव्वाँ। वाऽहं। अहैतस्यं। एतस्यं क्रियते। क्रियते किम्। किंव्वाँ। वा न। न यत्। यद् वै। वा अद्ध्वर्युः। अद्ध्वर्यु-रग्नेः। अग्नेश्चिन्वन्न्। चिन्वन्नन्तरेति। अन्तरेत्यात्मनः। अन्तरेतीत्यन्तः—एति। आत्मनो वै। वै तत्। तदन्तः। अन्तरेति। एति याः। यास्ते। ते अग्ने। अग्ने समिधः। समिधो यानि। समिध इति सम्—इधः। यानि धाम। ॥ [३३] ॥ धामेति। इत्याह। आहैषा। एषा वै। वा अग्नेः। अग्नेः स्वयञ्चितिः। स्वयञ्चितिरग्निः। स्वयञ्चितिरिति स्वयम्—चितिः। अग्निरेव। एव तत्। तदग्निम्। अग्निम् चिनोति। चिनोति न। नाद्ध्वर्युः। अद्ध्वर्युरात्मनः। आत्मनोऽन्तः। अन्तरेति। एति चतस्रः। चतस्र आशाः। आशाः प्र। प्र चरन्तु। चरन्त्वग्नयः। अग्नय इमम्। इमम् नः। नो यज्ञम्। यज्ञम् नयतु। नयतु प्रजानन्न्। प्रजानन्निति प्र—जानन्न्॥ घृतम् पिन्वन्न्। पिन्वन्नजरम्। अजरꣳ सुवीरम्। सुवीरम् ब्रह्म। सुवीरमिति सु—वीरम्। ब्रह्म समित्। समिद् भवति। समिदिति सम्—इत्। भवत्याहुतीनाम्। आहुतीनामित्या—हुतीनाम्॥ सुवर्गाय वै। सुवर्गायेति सुवः—गाय। वा एषः। एष लोकाय। लोकायोप। उप धीयते। धीयते यत्। यत् कूर्मः। कूर्मश्चतस्रः। चतस्र आशाः। आशाः प्र। प्र चरन्तु। चरन्त्वग्नयः। अग्नय इति। इत्याह। आह दिशः। ॥ [३४] ॥ दिश एव। एवैतेन। एतेन प्र। प्र जानाति। जानातीमम्। इमम् नः। नो यज्ञम्। यज्ञम् नयतु। नयतु प्रजानन्न्। प्रजानन्निति। प्रजानन्निति प्र—जानन्न्। इत्याह। आह सुवर्गस्य। सुवर्गस्य लोकस्य। सुवर्गस्येति सुवः—गस्य। लोकस्याभिनीत्यै। अभिनीत्यै ब्रह्म। अभिनीत्या इत्यभि—नीत्यै। ब्रह्म समित्। समिद् भवति। समिदिति सम्—इत्। भवत्याहुतीनाम्। आहुतीनामिति। आहुतीनामित्या—हुतीनाम्। इत्याह। आह ब्रह्मणा। ब्रह्मणा वै। वै देवाः। देवाः सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमायन्न्। आयन्न्यत्। यद् ब्रह्मण्वत्या। ब्रह्मण्वत्योपदधाति। ब्रह्मण्वत्येति ब्रह्मण्—वत्या। उपदधाति ब्रह्मणा। उपदधातीत्युप—दधाति। ब्रह्मणैव। एव तत्। तद् यजमानः। यजमानः सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमेति। एति प्रजापतिः। प्रजापतिर् वै। प्रजापति-रिति प्रजा—पतिः। वा एषः। एष यत्। यदग्निः। अग्निस्तस्य। तस्य प्रजाः। प्रजाः पशवः। प्रजा इति प्र—जाः। पशवश्छन्दाꣳसि। छन्दाꣳसि रूपम्। रूपꣳ सर्वान्। सर्वान्वर्णान्। वर्णा-

निष्टकानाम्। इष्टकानाम् कुर्यात्। कुर्याद् रूपेण। रूपेणैव। एव प्रजाम्। प्रजाम् पशून्। प्रजामिति प्र—जाम्। पशूञ्छन्दांसि। छन्दाꣳस्यव। अव रुन्धे। रुन्धेऽथो। अथो प्रजाभ्यः। अथो इत्यथो। प्रजाभ्य एव। प्रजाभ्य इति प्र—जाभ्यः। एवैनम्। एनम् पशुभ्यः। पशुभ्यश्छन्दोभ्यः। पशुभ्य इति पशु—भ्यः। छन्दोभ्योऽवरुद्ध्य। छन्दोभ्य इति छन्दः—भ्यः। अवरुद्ध्य चिनुते। अवरुद्ध्येत्यव—रुद्ध्य। चिनुत इति चिनुते॥ ॥ [३५] ॥

(यान्य ग्नय इत्याहे ष्टकानां षोडश च) ॥ ८ ॥

मयि गृह्णामि। गृह्णाम्यग्रे। अग्रे अग्निम्। अग्निꣳ रायः। रायस्पोषाय। पोषाय सुप्रजास्त्वाय। सुप्रजास्त्वाय सुवीर्याय। सुप्रजास्त्वायेति सुप्रजाः—त्वाय। सुवीर्यायेति सु—वीर्याय॥ मयि प्रजाम्। प्रजाम् मयि। प्रजामिति प्र—जाम्। मयि वर्चः। वर्चो दधामि। दधाम्यरिष्टाः। अरिष्टाः स्याम। स्याम तनुवा। तनुवा सुवीराः। सुवीरा इति सु—वीराः॥ यो नः। नो अग्निः। अग्निः पितरः। पितरो हृत्सु। हृत्स्वन्तः। हृत्स्विति हृत्—सु। अन्तरमर्त्यः। अमर्त्यो मर्त्यान्। मर्त्याꣳ आविवेश। आविवेशेत्या—विवेश॥ तमात्मन्न्। आत्मन् परि। परि गृह्णीमहे। गृह्णीमहे वयम्। वयम् मा। मा सः। सो अस्मान्। अस्माꣳ अवहाय। अवहाय परा। अवहायेत्यव—हाय। परा गात्। गादिति गात्॥ यदद्ध्वर्युः। अद्ध्वर्युरात्मन्न्। आत्मन्नग्निम्। अग्निमगृहीत्वा। अगृहीत्वाऽग्निम्। अग्निम् चिनुयात्। चिनुयाद् यः। योऽस्य। अस्य स्वः। स्वोऽग्निः। अग्निस्तम्। तमपि। अपि यजमानाय। ॥ [३६] ॥ यजमानाय चिनुयात्। चिनुयादग्निम्। अग्निम् खलु। खलु वै। वै पशवः। पशवोऽनु। अनूप। उप तिष्ठन्ते। तिष्ठन्तेऽपक्रामुकाः। अपक्रामुका अस्मात्। अपक्रामुका इत्यप—क्रामुकाः। अस्मात् पशवः। पशवः स्युः। स्युर् मयि। मयि गृह्णामि। गृह्णाम्यग्रे। अग्रे अग्निम्। अग्निमिति। इत्याह। आहात्मन्न्। आत्मन्नेव। एव स्वम्। स्वमग्निम्। अग्निम् दाधार। दाधार न। नास्मात्। अस्मात् पशवः। पशवोऽप। अप क्रामन्ति। क्रामन्ति ब्रह्मवादिनः। ब्रह्मवादिनो वदन्ति। ब्रह्मवादिन इति ब्रह्म—वादिनः। वदन्ति यत्। यन् मृत्। मृच् च। चापः। आपश्च। चाग्नेः। अग्नेरनाद्यम्। अनाद्यमथ। अथ कस्मात्। कस्मान् मृदा। मृदा च। चाद्भिः। अद्भिश्च। अद्भिरित्यत्—भिः। चाग्निः। अग्नि-

श्चीयते। चीयत इति। इति यत्। यदद्भिः। अद्भिः सय्ँयौति। अद्भिरित्यत्—भिः। सय्ँयौ-
त्यापः। सय्ँयौतीति सम्—यौति। ॥ [३७] ॥ आपो वै। वै सर्वाः। सर्वा देवताः। देवता
देवताभिः। देवताभिरेव। एवैनम्। एनꣳ सम्। सꣳ सृजति। सृजति यत्। यन् मृदा। मृदा
चिनोति। चिनोतीयम्। इयव्ँवै। वा अग्निः। अग्निर् वैश्वानरः। वैश्वानरोऽग्निना। अग्निनैव। एव
तत्। तदग्निम्। अग्निम् चिनोति। चिनोति ब्रह्मवादिनः। ब्रह्मवादिनो वदन्ति। ब्रह्मवादिन इति
ब्रह्म—वादिनः। वदन्ति यत्। यन् मृदा। मृदा च। चाद्भिः। अद्भिश्च। अद्भिरित्यत्—भिः।
चाग्निः। अग्निश्चीयते। चीयतेऽथ। अथ कस्मात्। कस्मादग्निः। अग्निरुच्यते। उच्यत इति।
इति यत्। यच्छन्दोभिः। छन्दोभिश्चिनोति। छन्दोभिरिति छन्दः—भिः। चिनोत्यग्नयः। अग्नयो
वै। वै छन्दाꣳसि। छन्दाꣳसि तस्मात्। तस्मादग्निः। अग्निरुच्यते। उच्यतेऽथो। अथो इयम्।
अथो इत्यथो। इयव्ँवै। वा अग्निः। अग्निर् वैश्वानरः। वैश्वानरो यत्। यन् मृदा। ॥ [३८] ॥
मृदा चिनोति। चिनोति तस्मात्। तस्मादग्निः। अग्निरुच्यते। उच्यते हिरण्येष्टकाः। हिरण्ये-
ष्टका उप। हिरण्येष्टका इति हिरण्य—इष्टकाः। उप दधाति। दधाति ज्योतिः। ज्योतिर् वै।
वै हिरण्यम्। हिरण्यम् ज्योतिः। ज्योतिरेव। एवास्मिन्न्। अस्मिन् दधाति। दधात्यथो। अथो
तेजः। अथो इत्यथो। तेजो वै। वै हिरण्यम्। हिरण्यम् तेजः। तेज एव। एवात्मन्न्। आत्मन्
धत्ते। धत्ते यः। यो वै। वा अग्निम्। अग्निꣳ सर्वतोमुखम्। सर्वतोमुखम् चिनुते। सर्वतो-
मुखमिति सर्वतः—मुखम्। चिनुते सर्वासु। सर्वासु प्रजासु। प्रजास्वन्नम्। प्रजास्विति प्र—
जासु। अन्नमत्ति। अत्ति सर्वाः। सर्वा दिशः। दिशोऽभि। अभि जयति। जयति गायत्रीम्।
गायत्रीम् पुरस्तात्। पुरस्तादुप। उप दधाति। दधाति त्रिष्टुभम्। त्रिष्टुभम् दक्षिणतः। दक्षि-
णतो जगतीम्। जगतीम् पश्चात्। पश्चादनुष्टुभम्। अनुष्टुभमुत्तरतः। अनुष्टुभमित्यनु—स्तुभम्।
उत्तरतः पङ्क्तिम्। उत्तरत इत्युत्—तरतः। पङ्क्तिम् मद्ध्ये। मद्ध्य एषः। एष वै। वा अग्निः।
अग्निः सर्वतोमुखः। सर्वतोमुखस्तम्। सर्वतोमुख इति सर्वतः—मुखः। तय्ँयः। य एवम्। एव-
व्ँविद्वान्। विद्वाꣳश्चिनुते। चिनुते सर्वासु। सर्वासु प्रजासु। प्रजास्वन्नम्। प्रजास्विति प्र—जासु।
अन्नमत्ति। अत्ति सर्वाः। सर्वा दिशः। दिशोऽभि। अभि जयति। जयत्यथो। अथो दिशि। अथो

इत्यर्थौ। दिश्येव। एव दिशम्। दिशम् प्र। प्र वयति। वयति तस्मात्। तस्माद् दिशि। दिशि दिक्। दिक् प्रोता। प्रोतेति प्र—उता॥ ॥ [३९] ॥

(अपि सय्यौति वैश्वानरो य देष वै पञ्चविश्शतिश्च) ॥ ९ ॥

प्रजापतिरग्निम्। प्रजापतिरिति प्रजा—पतिः। अग्निमसृजत। असृजत सः। सोऽस्मात्। अस्माथ् सृष्टः। सृष्टः प्राङ्ङ्। प्राङ् प्र। प्राद्रवत्। अद्रवत् तस्मै। तस्मा अश्वम्। अश्वम् प्रति। प्रत्यास्यत्। आस्यथ् सः। स दक्षिणा। दक्षिणा ऽऽवर्तत। आ ऽवर्तत। अवर्तत तस्मै। तस्मै वृष्णिम्। वृष्णिम् प्रति। प्रत्यास्यत्। आस्यथ् सः। स प्रत्यङ्ङ्। प्रत्यङ्ङा। आऽवर्तत। अवर्तत तस्मै। तस्मा ऋषभम्। ऋषभम् प्रति। प्रत्यास्यत्। आस्यथ् सः। स उदङ्ङ्। उदङ्ङा। आऽवर्तत। अवर्तत तस्मै। तस्मै बस्तम्। बस्तम् प्रति। प्रत्यास्यत्। आस्यथ् सः। स ऊर्ध्वः। ऊर्ध्वोऽद्रवत्। अद्रवत् तस्मै। तस्मै पुरुषम्। पुरुषम् प्रति। प्रत्यास्यत्। आस्यद् यत्। यत् पशुशीर्षाणि। पशुशीर्षाण्युपदधाति। पशुशीर्षाणीति पशु—शीर्षाणि। उपदधाति सर्वतः। उपदधातीत्युप—दधाति। सर्वत एव। एवैनम्। एनमवरुद्ध्य। ॥ [४०] ॥ अवरुद्ध्य चिनुते। अवरुद्ध्येत्यव—रुद्ध्य। चिनुत एताः। एता वै। वै प्राणभृतः। प्राणभृतश्चक्षुष्मतीः। प्राण-भृत इति प्राण—भृतः। चक्षुष्मतीरिष्टकाः। इष्टका यत्। यत् पशुशीर्षाणि। पशुशीर्षाणि यत्। पशुशीर्षाणीति पशु—शीर्षाणि। यत् पशुशीर्षाणि। पशुशीर्षाण्युपदधाति। पशु-शीर्षाणीति पशु—शीर्षाणि। उपदधाति ताभिः। उपदधातीत्युप—दधाति। ताभिरेव। एव यजमानः। यजमानोऽमुष्मिन्न्। अमुष्मिँल्लोके। लोके प्र। प्राणिति। अनित्यर्थौ। अथो ताभिः। अथो इत्यर्थौ। ताभिरेव। एवास्मै। अस्मा इमे। इमे लोकाः। लोकाः प्र। प्र भान्ति। भान्ति मृदा। मृदाऽभिलिप्य। अभिलिप्योप। अभिलिप्येत्यभि—लिप्य। उप दधाति। दधाति मेद्ध्य-त्वाय। मेद्ध्यत्वाय पशुः। मेद्ध्यत्वायेति मेद्ध्य—त्वाय। पशुर् वै। वा एषः। एष यत्। यदग्निः। अग्निरन्नम्। अन्नम् पशवः। पशव एषः। एष खलु। खलु वै। वा अग्निः। अग्निर् यत्। यत् पशुशीर्षाणि। पशुशीर्षाणि यम्। पशुशीर्षाणीति पशु—शीर्षाणि। यम् कामयेत। कामयेत कनीयः। कनीयोऽस्य। अस्यान्नम्। अन्नꣳ स्यात्। ॥ [४१] ॥ स्यादिति। इति सन्तराम्।

सन्तराम् तस्य। सन्तरामिति सम्—तराम्। तस्य पशुशीर्षाणि। पशुशीर्षाण्युप। पशुशीर्षाणीति पशु—शीर्षाणि। उप दद्ध्यात्। दद्ध्यात् कनीयः। कनीय एव। एवास्य। अस्यान्नम्। अन्नम् भवति। भवति यम्। यम् कामयेत। कामयेत समावत्। समावदस्य। अस्यान्नम्। अन्नꣳ स्यात्। स्यादिति। इति मद्ध्यतः। मद्ध्यतस्तस्य। तस्योप। उप दद्ध्यात्। दद्ध्याथ् समावत्। समावदेव। एवास्य। अस्यान्नम्। अन्नम् भवति। भवति यम्। यम् कामयेत। कामयेत भूयः। भूयोऽस्य। अस्यान्नम्। अन्नꣳ स्यात्। स्यादिति। इत्यन्तेषु। अन्तेषु तस्य। तस्य व्युदूह्य। व्युदूह्योप। व्युदूह्येति वि—उदूह्य। उप दद्ध्यात्। दद्ध्यादन्ततः। अन्तत एव। एवास्मै। अस्मा अन्नम्। अन्नमव। अव रुन्धे। रुन्धे भूयः। भूयोऽस्य। अस्यान्नम्। अन्नम् भवति। भवतीति भवति॥ ॥ [४२] ॥

(एन मस्यान्नम् भूयोऽस्यान्नम् भवति) ॥ १० ॥

स्तेगान् दꣳष्ट्राभ्याम्। दꣳष्ट्राभ्याम् मण्डूकान्। मण्डूकान् जम्भ्येभिः। जम्भ्येभिरादकाम्। आदकाम् खादेन। खादेनोर्जम्। ऊर्जꣳ सꣳसूदेन। सꣳसूदेनारण्यम्। सꣳसूदेनेति सम्—सूदेन। अरण्यम् जाम्बीलेन। जाम्बीलेन मृदम्। मृदम् बस्वैभिः। बस्वैभिः शर्कराभिः। शर्कराभिरवकाम्। अवकामवकाभिः। अवकाभिः शर्कराम्। शर्करामुथ्सादेन। उथ्सादेन जिह्वाम्। उथ्सादेनेत्युत्—सादेन। जिह्वामवक्रन्देन। अवक्रन्देन तालुम्। अवक्रन्देनेत्यव—क्रन्देन। तालुꣳ सरस्वतीम्। सरस्वतीम् जिह्वाग्रेण। जिह्वाग्रेणेति जिह्वा—अग्रेण॥ ॥ [४३] ॥

(स्तेगान् द्वाविꣳशतिः) ॥ ११ ॥

वाजꣳ हनूभ्याम्। हनूभ्यामपः। हनूभ्यामिति हनु—भ्याम्। अप आस्येन। आस्येनादित्यान्। आदित्यान् श्मश्रुभिः। श्मश्रुभिरुपयामम्। श्मश्रुभिरिति श्मश्रु—भिः। उपयाममधरेण। उपयाममित्युप—यामम्। अधरेणोष्ठेन। ओष्ठेन सत्। सदुत्तरेण। उत्तरेणान्तरेण। उत्तरेणेत्युत्—तरेण। अन्तरेणानूकाशम्। अनूकाशम् प्रकाशेन। अनूकाशमित्यनु—काशम्। प्रकाशेन बाह्यम्। प्रकाशेनेति प्र—काशेन। बाह्यꣳ स्तनयित्नुम्। स्तनयित्नुम् निर्बाधेन। निर्बाधेन

सूर्याग्नी। निर्बाधेनेति निः—बाधेन। सूर्याग्नी चक्षुर्भ्याम्। सूर्याग्नी इति सूर्य—अग्नी। चक्षुर्भ्यां-व्विँद्युतौ। चक्षुर्भ्यामिति चक्षुः—भ्याम्। विद्युतौ कनानकाभ्याम्। विद्युताविति वि—द्युतौ। कनानकाभ्यामशनिम्। अशनिम् मस्तिष्केण। मस्तिष्केण बलम्। बलम् मज्जभिः। मज्जभिरिति मज्ज—भिः॥ ॥ [४४] ॥

(वाजम् पञ्चविꣳशतिः) ॥ १२ ॥

---

कूर्माञ्छफैः। शफैरच्छलाभिः। अच्छलाभिः कपिञ्जलान्। कपिञ्जलान्थ् साम। साम कुष्ठिकाभिः। कुष्ठिकाभिर् जवम्। जवम् जङ्घाभिः। जङ्घाभिरगदम्। अगदम् जानुभ्याम्। जानुभ्यांव्वीँर्यम्। जानुभ्यामिति जानु—भ्याम्। वीर्यम् कुहाभ्याम्। कुहाभ्याम् भयम्। भयम् प्रचालाभ्याम्। प्रचालाभ्याम् गुहा। प्रचालाभ्यामिति प्र—चालाभ्याम्। गुहोपपक्षाभ्याम्। उपपक्षाभ्यामश्विनौ। उपपक्षाभ्यामित्युप—पक्षाभ्याम्। अश्विनावꣳसाभ्याम्। अꣳसाभ्याममदितिम्। अदितिꣳ शीर्ष्णा। शीर्ष्णा निर्ऋतिम्। निर्ऋतिम् निर्जाल्मकेन। निर्ऋतिमिति निः—ऋतिम्। निर्जाल्मकेन शीर्ष्णा। निर्जाल्मकेनेति निः—जाल्मकेन। शीर्ष्णेति शीर्ष्णा॥ ॥ [४५] ॥

(कूर्मान् त्रयोविꣳशतिः) ॥ १३ ॥

---

योक्त्रम् गृध्राभिः। गृध्राभिर् युगम्। युगमानतेन। आनतेन चित्तम्। आनतेनेत्या—नतेन। चित्तम् मन्याभिः। मन्याभिः सङ्क्रोशान्। सङ्क्रोशान् प्राणैः। सङ्क्रोशानिति सम्—क्रोशान्। प्राणैः प्रकाशेन। प्राणैरिति प्र—अनैः। प्रकाशेन त्वचम्। प्रकाशेनेति प्र—काशेन। त्वचम् पराकाशेन। पराकाशेनान्तराम्। पराकाशेनेति परा—काशेन। अन्तराम् मशकान्। मशकान् केशैः। केशैरिन्द्रम्। इन्द्रꣳ स्वपसा। स्वपसा वहेन। स्वपसेति सु—अपसा। वहेन बृहस्पतिम्। बृहस्पतिꣳ शकुनिसादेन। शकुनिसादेन रथम्। शकुनिसादेनेति शकुनि—सादेन। रथमुष्णिहाभिः। उष्णिहाभिरित्युष्णिहाभिः॥ ॥ [४६] ॥

(योक्त्र॒ मेक॑विꣳशतिः) ॥ १४ ॥

मि॒त्रावरु॑णौ श्रोणी᳚भ्याम्। मि॒त्रावरु॑णा॒विति॑ मि॒त्रा—वरु॑णौ। श्रोणी᳚भ्यामिन्द्रा॒ग्नी। श्रोणी᳚-
भ्या॒मिति॒ श्रोणि॑—भ्या॒म्। इ॒न्द्रा॒ग्नी शि॑ख॒ण्डाभ्या᳚म्। इ॒न्द्रा॒ग्नी इती᳚न्द्र—अ॒ग्नी। शि॒ख॒ण्डा-
भ्या॒मिन्द्रा॒बृह॒स्पती᳚। इ॒न्द्रा॒बृह॒स्पती॑ ऊ॒रुभ्या᳚म्। इ॒न्द्रा॒बृह॒स्पती॒ इतीन्द्रा᳚—बृह॒स्पती᳚। ऊ॒रु-
भ्या॒मिन्द्रा॒विष्णू᳚। ऊ॒रुभ्या॒मित्यू॒रु—भ्या॒म्। इन्द्रा॒विष्णू॑ अ॒ष्ठी॒वद्भ्या᳚म्। इन्द्रा॒विष्णू॒ इतीन्द्रा᳚—
विष्णू᳚। अ॒ष्ठी॒वद्भ्याꣳ॑ स॒वि॒तार᳚म्। अ॒ष्ठी॒वद्भ्या॒मित्य॑ष्ठी॒वत्—भ्या॒म्। स॒वि॒तार॒म्पुच्छे॑न। पुच्छे॑न
गन्ध॒र्वान्। ग॒न्ध॒र्वाञ्छेपे॑न। शेपे॑नाफ्स॒रस॑ः। अ॒फ्स॒रसो॑ मु॒ष्काभ्या᳚म्। मु॒ष्काभ्या॒म् पव॑मानम्।
पव॑मानम् पा॒युना᳚। पा॒युना॑ प॒वित्र᳚म्। प॒वित्र॒म् पोत्रा᳚भ्याम्। पोत्रा᳚भ्यामा॒क्रम॑णम्। आ॒क्रम॑णꣳ
स्थू॒राभ्या᳚म्। आ॒क्रम॑णमित्या᳚—क्रम॑णम्। स्थू॒राभ्या᳚म् प्रति॒क्रम॑णम्। प्र॒ति॒क्रम॑णम् कुष्ठा᳚भ्याम्।
प्र॒ति॒क्रम॑ण॒मिति॑ प्रति—क्रम॑णम्। कुष्ठा᳚भ्या॒मिति॒ कुष्ठा᳚भ्याम्॥ ॥ [४७] ॥

(मि॒त्रावरु॑णौ॒ द्वावि॑ꣳशतिः) ॥ १५ ॥

इन्द्र॑स्य क्रो॒डः। क्रो॒डोऽदि॑त्यै। अदि॑त्यै पाज॒स्य᳚म्। पा॒ज॒स्य॑म् दि॒शाम्। दि॒शाम् ज॒त्रव॑ः।
ज॒त्रवो॑ जी॒मूता॑न्। जी॒मूता॑न् हृदयौप॒शाभ्या᳚म्। हृ॒द॒यौ॒प॒शाभ्या॑म॒न्तरि॑क्षम्। हृ॒द॒यौ॒प॒शाभ्या॒-
मिति॑ हृदय—औ॒प॒शाभ्या᳚म्। अ॒न्तरि॑क्षम् पुरि॒तता᳚। पु॒रि॒तता॒ नभ॑ः। नभ॑ उद॒र्ये॑ण। उ॒द॒र्ये॑-
णेन्द्रा॒णीम्। इ॒न्द्रा॒णीम् प्ली॒ह्ना। प्ली॒ह्ना व॒ल्मीका॑न्। व॒ल्मीका᳚न् क्लो॒म्ना। क्लो॒म्ना गि॒रीन्। गि॒रीन्
प्ला॒शिभि॑ः। प्ला॒शिभि॑ः समु॒द्रम्। प्ला॒शिभि॒रिति॑ प्ला॒शि—भि॒ः। स॒मु॒द्रमु॒दरे॑ण। उ॒दरे॑ण वैश्वान॒रम्।
वै॒श्वा॒न॒रम् भस्म॑ना। भस्म॒नेति॒ भस्म॑ना॥ ॥ [४८] ॥

(इन्द्र॑स्य॒ द्वावि॑ꣳशतिः) ॥ १६ ॥

पू॒ष्णो व॑नि॒ष्ठुः। व॒नि॒ष्ठुर॒न्धाहे॑ः। अ॒न्धाहे॑ः स्थू॒रगु॒दा। अ॒न्धाहे॒रित्य॒न्ध—अ॒हेः। स्थू॒रगु॒दा
स॒र्पान्। स्थू॒रगु॒देति॑ स्थू॒र—गु॒दा। स॒र्पान् गुदा॑भिः। गुदा॑भिर्ऋ॒तून्। ऋ॒तून् पृ॒ष्टीभि॑ः। पृ॒ष्टीभि॑र्

दिवम्। पृष्टीभिरिति पृष्टि—भिः। दिवम् पृष्ठेन। पृष्ठेन वसूनाम्। वसूनाम् प्रथमा। प्रथमा कीकसा। कीकसा रुद्राणाम्। रुद्राणाम् द्वितीया। द्वितीयाऽऽदित्यानाम्। आदित्यानाम् तृतीया। तृतीयाऽङ्गिरसाम्। अङ्गिरसाम् चतुर्थी। चतुर्थी साद्ध्यानाम्। साद्ध्यानाम् पञ्चमी। पञ्चमी विश्वेषाम्। विश्वेषाम् देवानाम्। देवानाꣳ षष्ठी। षष्ठीति षष्ठी॥ ॥ [४९] ॥

(पूष्ण श्चतुर्विꣳशतिः) ॥ १७ ॥

ओजो ग्रीवाभिः। ग्रीवाभिर् निर्ऋतिम्। निर्ऋतिमस्थभिः। निर्ऋतिमिति निः—ऋतिम्। अस्थभिरिन्द्रम्। अस्थभिरित्यस्थ—भिः। इन्द्रꣳ स्वपसा। स्वपसा वहेन। स्वपसेति सु—अपसा। वहेन रुद्रस्य। रुद्रस्य विचलः। विचलः स्कन्धः। विचल इति वि—चलः। स्कन्धोऽहोरात्रयोः। अहोरात्रयोर् द्वितीयः। अहोरात्रयोरित्यहः—रात्रयोः। द्वितीयोऽर्द्ध-मासानाम्। अर्द्धमासानाम् तृतीयः। अर्द्धमासानामित्यर्द्ध—मासानाम्। तृतीयो मासाम्। मासाम् चतुर्थः। चतुर्थ ऋतूनाम्। ऋतूनाम् पञ्चमः। पञ्चमः सँव्वथ्सरस्य। सँव्वथ्सरस्य षष्ठः। सम्वथ्सरस्येति सम्—वथ्सरस्य। षष्ठ इति षष्ठः॥ ॥ [५०] ॥

(ओजो विꣳशतिः) ॥ १८ ॥

आनन्दम् नन्दथुना। आनन्दमित्या—नन्दम्। नन्दथुना कामम्। कामम् प्रत्यासाभ्याम्। प्रत्यासाभ्याम् भयम्। प्रत्यासाभ्यामिति प्रति—आसाभ्याम्। भयꣳ शितीमभ्याम्। शिती-मभ्याम् प्रशिषम्। शितीमभ्यामिति शितीम—भ्याम्। प्रशिषम् प्रशासाभ्याम्। प्रशिषमिति प्र—शिषम्। प्रशासाभ्याꣳ सूर्याचन्द्रमसौ। प्रशासाभ्यामिति प्र—शासाभ्याम्। सूर्याचन्द्रमसौ वृक्याभ्याम्। सूर्याचन्द्रमसाविति सूर्या—चन्द्रमसौ। वृक्याभ्याꣳ श्यामशबलौ। श्यामशबलौ मतस्नाभ्याम्। श्यामशबलाविति श्याम—शबलौ। मतस्नाभ्यावँव्व्युष्टिम्। व्युष्टिꣳ रूपेण। व्युष्टि-मिति वि—उष्टिम्। रूपेण निम्रुक्तिम्। निम्रुक्तिमरूपेण। निम्रुक्तिमिति नि—म्रुक्तिम्। अरूपेणे-त्यरूपेण॥ ॥ [५१] ॥

(आनन्दꣳ षोडश) ॥ १९ ॥

अहर्माꣳसेन। माꣳसेन रात्रिम्। रात्रिम् पीवसा। पीवसाऽपः। अपो यूषेण। यूषेण घृतम्। घृतꣳ रसेन। रसेन श्याम्। श्याँव्वसया। वसया दूषीकाभिः। दूषीकाभिर् ह्रादुनिम्। ह्रादुनिम-श्रुभिः। अश्रुभिः पृष्वाम्। अश्रुभिरित्यश्रु—भिः। पृष्वाम् दिवम्। दिवꣳ रूपेण। रूपेण नक्ष-त्राणि। नक्षत्राणि प्रतिरूपेण। प्रतिरूपेण पृथिवीम्। प्रतिरूपेणेति प्रति—रूपेण। पृथिवीम् चर्मणा। चर्मणा छवीम्। छवीम् छव्या। छव्योपाकृताय। उपाकृताय स्वाहा। उपाकृतायेत्युप—आकृताय। स्वाहाऽऽलब्धाय। आलब्धाय स्वाहा। आलब्धायेत्या—लब्धाय। स्वाहा हुताय। हुताय स्वाहा। स्वाहेति स्वाहा॥ ॥ [५२] ॥

(अहर् द्वाविꣳशतिः) ॥ २० ॥

अग्नेः पक्षतिः। पक्षतिः सरस्वत्यै। सरस्वत्यै निपक्षतिः। निपक्षतिः सोमस्य। निप-क्षतिरिति नि—पक्षतिः। सोमस्य तृतीया। तृतीयाऽपाम्। अपाम् चतुर्थी। चतुर्थ्योषधीनाम्। ओषधीनाम् पञ्चमी। पञ्चमी सँव्वथ्सरस्य। सँव्वथ्सरस्य षष्ठी। सँव्वथ्सरस्येति सम्—वथ्स-रस्य। षष्ठी मरुताम्। मरुताꣳ सप्तमी। सप्तमी बृहस्पतेः। बृहस्पतेरष्टमी। अष्टमी मित्रस्य। मित्रस्य नवमी। नवमी वरुणस्य। वरुणस्य दशमी। दशमीन्द्रस्य। इन्द्रस्यैकादशी। एका-दशी विश्वेषाम्। विश्वेषाम् देवानाम्। देवानाम् द्वादशी। द्वादशी द्यावापृथिव्योः। द्यावापृ-थिव्योः पार्श्वम्। द्यावापृथिव्योरिति द्यावा—पृथिव्योः। पार्श्वँय्यमस्य। यमस्य पाटूरः। पाटूर इति पाटूरः॥ ॥ [५३] ॥

(अग्ने रेकान्नत्रिꣳशत्) ॥ २१ ॥

वायोः पक्षतिः। पक्षतिः सरस्वतः। सरस्वतो निपक्षतिः। निपक्षतिश्चन्द्रमसः। निप-क्षतिरिति नि—पक्षतिः। चन्द्रमसस्तृतीया। तृतीया नक्षत्राणाम्। नक्षत्राणाम् चतुर्थी।

चतुर्थी सवितुः। सवितुः पञ्चमी। पञ्चमी रुद्रस्य। रुद्रस्य षष्ठी। षष्ठी सर्पाणाम्। सर्पाणाꣳ सप्तमी। सप्तम्यर्यम्णः। अर्यम्णोऽष्टमी। अष्टमी त्वष्टुः। त्वष्टुर् नवमी। नवमी धातुः। धातुर् दशमी। दशमीन्द्राण्याः। इन्द्राण्या एकादशी। एकादश्यदित्यै। अदित्यै द्वादशी। द्वादशी द्यावापृथिव्योः। द्यावापृथिव्योः पार्श्वम्। द्यावापृथीव्योरिति द्यावा—पृथिव्योः। पार्श्वँय्यम्यै। यम्यै पाटूरः। पाटूर इति पाटूरः॥ ॥ [५४] ॥

(वायो रष्टाविꣳशतिः) ॥ २२ ॥

---

पन्थामनूवृग्भ्याम्। अनूवृग्भ्याꣳ सन्ततिम्। अनूवृग्भ्यामित्यनूवृक्—भ्याम्। सन्ततिꣳ स्नावन्याभ्याम्। सन्ततिमिति सम्—ततिम्। स्नावन्याभ्याꣳ शुकान्। शुकान् पित्तेन। पित्तेन हरिमाणम्। हरिमाणँय्यक्ना। यक्ना हलीक्ष्णान्। हलीक्ष्णान् पापवातेन। पापवातेन कूश्मान्। पापवातेनेति पाप—वातेन। कूश्माञ्छकभिः। शकभिः शवर्तान्। शकभिरिति शक—भिः। शवर्तानूवध्येन। ऊवध्येन शुनः। शुनो विशसनेन। विशसनेन सर्पान्। विशसनेनेति वि—शसनेन। सर्पाँल्लोहितगन्धेन। लोहितगन्धेन वयाꣳसि। लोहितगन्धेनेति लोहित—गन्धेन। वयाꣳसि पक्वगन्धेन। पक्वगन्धेन पिपीलिकाः। पक्वगन्धेनेति पक्व—गन्धेन। पिपीलिकाः प्रशादेन। प्रशादेनेति प्र—शादेन॥ ॥ [५५] ॥

(पन्थाम् द्वाविꣳशतिः) ॥ २३ ॥

---

क्रमैरति। अत्यक्रमीत्। अक्रमीद् वाजी। वाजी विश्वैः। विश्वैर् देवैः। देवैर् यज्ञियैः। यज्ञियैः सँव्विदानः। सँव्विदान इति सम्—विदानः॥ स नः। नो नय। नय सुकृतस्य। सुकृतस्य लोकम्। सुकृतस्येति सु—कृतस्य। लोकम् तस्य। तस्य ते। ते वयम्। वयꣳ स्वधया। स्वधया मदेम। स्वधयेति स्व—धया। मदेमेति मदेम॥ ॥ [५६] ॥

(क्रमै रष्टादश) ॥ २४ ॥

---

द्यौस्ते। ते पृष्ठम्। पृष्ठम् पृथिवी। पृथिवी सधस्थम्। सधस्थमात्मा। सधस्थमिति सध—स्थम्। आत्माऽन्तरिख्षम्। अन्तरिख्षꣳ समुद्रः। समुद्रो योनिः। योनिः सूर्यः। सूर्यस्ते। ते चख्षुः। चख्षुर् वातः। वातः प्राणः। प्राणश्चन्द्रमाः। प्राण इति प्र—अनः। चन्द्रमाः श्रोत्रम्। श्रोत्रम् मासाः। मासाश्च। चार्द्धमासाः। अर्द्धमासाश्च। अर्द्धमासा इत्यर्द्ध—मासाः। च पर्वाणि। पर्वाण्यृतवः। ऋतवोऽङ्गानि। अङ्गानि सँव्वथ्सरः। सँव्वथ्सरो महिमा। सँव्व-थ्सर इति सम्—वथ्सरः। महिमेति महिमा॥ ॥ [५७] ॥

(द्यौः पञ्चविꣳशतिः) ॥ २५ ॥

अग्निः पशुः। पशुरासीत्। आसीत् तेन। तेनायजन्त। अयजन्त सः। स एतम्। एत-हँल्लोकम्। लोकमजयत्। अजयद् यस्मिन्न्। यस्मिन्नग्निः। अग्निः सः। स ते। ते लोकः। लोक स्तम्। तम् जेष्यसि। जेष्यस्यथ। अथाव। अव जिघ्र। जिघ्र वायुः। वायुः पशुः। पशु-रासीत्। आसीत् तेन। तेनायजन्त। अजयन्त सः। स एतम्। एतहँल्लोकम्। लोकमजयत्। अजयद् यस्मिन्न्। यस्मिन् वायुः। वायुः सः। स ते। ते लोकः। लोकस्तस्मात्। तस्मात् त्वा। त्वाऽन्तः। अन्तरेष्यामि। एष्यामि यदि। यदि न। नावजिघ्रसि। अवजिघ्रस्यादित्यः। अवजि-घ्रसीत्यव—जिघ्रसि। आदित्यः पशुः। पशुरासीत्। आसीत् तेन। तेनायजन्त। अयजन्त सः। स एतम्। एतहँल्लोकम्। लोकमजयत्। अजयद् यस्मिन्न्। यस्मिन्नादित्यः। आदित्यः सः। स ते। ते लोकः। लोकस्तम्। तम् जेष्यसि। जेष्यसि यदि। यद्यवजिघ्रसि। अवजिघ्रसीत्यव—जिघ्रसि॥ ॥ [५८] ॥

(यस्मिं न्नष्टौ च) ॥ २६ ॥

॥ हरिः ॐ ॥

पञ्चमकाण्डे सप्तमः प्रश्नः — क्रम पाठः — समाप्तः

| अनुवाकाः | पञ्चाशत्यः |
|---|---|
| २६ | ५८ |

ॐ